# Skanda Stotram or Subrahmanya Stotram

# श्रीस्कन्दस्तोत्रम् अथवा सुब्रह्मण्यस्तोत्रम्

## Document Information

Text title : Skanda or Subrahmanya Stotram

File name : skandastotram.itx

Category : subrahmanya, aShottarashatanAma

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description-comments : Portion is termed as skanda panchAshata nAma stotram. See 108 corresponding Namavali

Latest update : April 12, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीस्कन्दस्तोत्रम् अथवा सुब्रह्मण्यस्तोत्रम्

ॐ श्रीगणेशाय नमः ।
युधिष्ठिरौवाच-
भगवञ्श्रोतुमिच्छामि नामानि च महात्मनः ।
त्रिषु लोकेषु यान्यस्य विख्यातानि द्विजोत्तम ॥ १॥

वैशम्पायन उवाच-
इत्युक्तः पाण्डवेयेन महात्मा ऋषिसन्निधौ ।
उवाच भगवांस्तत्र मार्कण्डेयो महातपाः ॥ २॥

आग्नेयश्चैव स्कन्दश्च दीप्तकीर्तिरनामयः ।
मयूरकेतुर्धर्मात्मा भूतेशो महिषार्दनः ॥ ३॥

कामजित्कामदः कान्तः सत्यवाग्भुवनेश्वरः ।
शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ॥ ४॥

अमोघस्त्वनघो रौद्रः प्रियश्चन्द्राननस्तथा ।
दीप्तशक्तिः प्रशान्तात्मा भद्रकुक्कुटमोहनः ॥ ५॥

षष्ठीप्रियश्च धर्मात्मा पवित्रो मातृवत्सलः ।
कन्याभर्ता विभक्तश्च स्वाहेयो रेवतीसुतः ॥ ६॥

प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः । var विरागश्च
सुव्रतो ललितश्चैव बालक्रीडनकप्रियः ॥ ७॥

खचारी ब्रह्मचारी च शूरः शरवणोद्भवः । var सुरः
विश्वामित्रप्रियश्चैव देवसेनाप्रियस्तथा ।
वासुदेवप्रियश्चैव प्रियः प्रियकृदेवतु ॥ ८॥

नामान्येतानि दिव्यानि कार्तिकेयस्य यः पठेत् ।
स्वर्गं कीर्तिं धनं चैव स लभेन्नात्रसंशयः ॥ ९॥

मार्कण्डेय उवाच -
स्तोष्यामि देवैरृषिभिश्च जुष्टं शक्त्या गुहं नामभिरप्रमेयम् ।
षडाननं शक्तिधरं सुवीर निबोध चैतानि कुरुप्रवीर ॥ १०॥

ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविच्च ब्रह्मेशयो ब्रह्मवतां वरिष्ठः ।
ब्रह्मप्रियः ब्राह्मणसर्वमन्त्री त्वं ब्रह्मणां ब्राह्मणानां च नेता ॥ ११॥

स्वाहा स्वधा त्वं परमं पवित्रं मन्त्रस्तुतस्त्वं प्रथितः षडर्चिः ।
संवत्सरस्त्वमृतवश्च षड्वै मासार्धमासाश्च दिनं दिशश्च ॥ १२॥

त्वं पुष्कराक्षस्त्वरविन्दवक्त्रः सहस्रचक्षुरसि सहस्रबाहुः ।
त्वं लोकपालः परमं हविश्च त्वं भावनः सर्वसुरासुराणाम् ॥ १३॥

त्वमेव सेनाधिपतिः प्रचण्डः प्रभुर्विभुश्चाप्यथ शक्रजेता ।
सहस्रपात्त्वं धरणी त्वमेव सहस्रतुष्टिश्च सहस्रभुक्त ॥ १४॥

सहस्रशीर्ष्णस्त्वमनन्तरूपः सहस्रपात्त्वं दशशक्तिधारी ।
गङ्गासुतस्त्वं स्वमतेन देव स्वाहामहीकृत्तिकानां तथैव ॥ १५॥

त्वं क्रीडसे षण्मुख कुक्कुटेन यथेष्टनानाविधकामरूपी ।
दीक्षाऽसि सोमो मरुतः सदैव धर्मोऽसि वायुरचलेन्द्र इन्द्रः ॥ १६॥

सनातनानामपि शाश्वतस्त्वं प्रभुः प्रभूणामपि चोग्रधन्वा ।
ऋतस्य कर्ता दितिजान्तकस्त्वं जेता रिपूणां प्रवरः सुराणाम् ॥ १७॥

सूक्ष्मं तपस्तत्परमं त्वमेव परावरज्ञोऽसि परावरस्त्वम् ।
धर्मस्य कामस्य परस्य चैव त्वत्तेजसा कृत्स्नमिदं महात्मन् ॥ १८॥

व्याप्तं जगत्सर्वसुरप्रवीर शक्त्या मया संस्तुतलोकनाथ ।
नमोऽस्तु ते द्वादशनेत्रबाहो अतःपरं वेद्मि गतिं न तेऽहम् ॥ १९॥

स्कन्दस्य य इदं विप्रः पठेज्जन्म समाहितः ।
श्रावयेद्ब्राह्मणेभ्यो यः शृणुयाद्वा द्विजेरितम् ॥ २०॥

धनमायुर्यशोदीप्तं पुत्रान् शत्रुजयं तथा ।
स पुष्टितुष्टी संप्राप्य स्कन्दसालोक्यमाप्नुयात् ॥ २१॥

॥ इति श्रीमन्महाभारतवनपर्वान्तर्गतं स्कन्द (सुब्रह्मण्य) स्तोत्रं सम्पूर्णम् ॥

स्कन्दाष्टोत्तरशतनामस्तोत्रम्

The first half is also given as Skanda Panchashata Nama Stotram **श्रीस्कन्दपञ्चाशतनामस्तोत्रम्** and corresonding nAmAvalI

Encoded by Sivakumar Thyagarajan Iyer

Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Skanda Stotram or Subrahmanya Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*